हरिः ॐ - श्रीविष्णु सहस्रनामम्

SRIRANGANATHAR_MOOLAVAR

PARABRAHMALINGAM BHAJE PAANDURANGAM

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥

यस्य द्विरद वक्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विश्वक्सेनं तमाश्रये ॥२॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जय मुदीरये ॥३॥

व्यासं वसिष्ठनफ्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥४॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥५॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥६॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥७॥

॥ ॐ नमो विष्णवे प्रभविष्णवे ॥

श्री वैशम्पायन उवाच ।

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।

युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥८॥

युधिष्ठिर उवाच ।

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥९॥
को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसार बन्धनात् ॥१०॥

श्री भीष्म उवाच ।

जगत्प्रभुं देवदेवं अनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥११॥
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥१२॥
अनादिनिधनं विष्णुं सर्वलोक महेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥१३॥
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥१४॥
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥१५॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद् ब्रह्म परमं यः परायणम् ॥१६॥
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥१७॥
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥१८॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे श्रृणु पापभयापहम् ॥१९॥
यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥२०॥
ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।
छन्दोऽनुष्टुप्तथा देवो भगवान् देवकीसुतः ॥२१॥
अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥२२॥
ॐ विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम् ॥२३॥

॥ अधिकः पाठः ॥

केशवः पातु मे पादौ जङ्घे नारायणो मम ।
माधवो मे कटिं पातु गोविन्दो गुह्यमेव च ॥२४॥
नाभिं विष्णुस्तु मे पातु जठरं मधुसूदनः ।
उरस्त्रिविक्रमः पातु हृदयं पातु वामनः ॥२५॥
श्रीधरः पातु मे कण्ठं हृषीकेशो मुखं मम ।
पद्मनाभस्तु नयने शिरो दामोदरो मम ॥२६॥
एवमेतानि नामानि जपकाले विशेषतः ।
विन्यसेदात्मरक्षार्थं सर्वमङ्गलसिद्धये ॥२७॥

अस्य श्री विष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य ।
श्रीवेदव्यासो भगवान् ऋषिः । अनुष्टुप् छन्दः ।
श्रीमहाविष्णुः परमात्मा श्रीमन् नारायणो देवता ।
अमृतांशूद्भवो भानुरिति बीजम् ।
देवकीनन्दनः स्रष्टेति शक्तिः ।
उद्भवः क्षोभणोदेव इति परमो मन्त्रः ।
शङ्ख भृन्नन्दकीचक्रीति कीलकम् ।
शार्ङ्गधन्वा गदाधर इति अस्त्रम् ।
रथाङ्गपाणिरक्षोभ्य इति नेत्रम् ।

त्रिसामा सामगः सामेति कवचम् ।

आनन्दं परब्रह्मेति योनिः ।

ऋतुः सुदर्शनःकाल इति दिग्बद्धः ।

श्रीविश्वरूप इति ध्यानम् ।

श्री महाविष्णु प्रीत्यर्थे सहस्रनामजपे विनियोगः ।

अथ करन्यासः ।

शङ्खाय अङ्गुष्ठाभ्यां नमः ।

चक्राय तर्जनीभ्यां नमः ।

गदायै मध्यमाभ्यां नमः ।

खड्गाय अनामिकाभ्यां नमः ।

शार्ङ्गाय कनिष्ठिकाभ्यां नम ।

पञ्चायुधाय करतलकरपृष्ठाभ्यां नमः ॥

अथ अङ्गन्यासः ॥

शङ्खाय हृदयाय नमः ।

चक्राय शिरसे स्वाहा ।

गदायै शिखायै वषट् ।

खड्गाय कवचाय हुम् ।

शार्ङ्गाय नेत्रत्रयाय वौषट् ।

पञ्चायुधाय अस्त्राय फट्।
भूर्भुवस्सुवरोम् इति दिग्बन्धः।

अथ ध्यानम् ।

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते
मौक्तिकानाम् मालाक्लृप्तासनस्थः
स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रै-रदभ्रैरुपरि विरचितै-र्मुक्तपीयूषवर्षैः आनन्दी
नः पुनीया-दरिनलिन-गदा-शङ्खपाणिर्मुकुन्दः ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्र सूर्यौ च
नेत्रे । कर्णावाशाः शिरोद्यौर्मुखमपि दहनो यस्य
वास्तेयमब्धिः । अन्तःस्थं यस्य विश्वं
सुरनरखगगोभोगिगन्धर्व दैत्यैः। चित्रं रंरम्यते
तं त्रिभुवन वपुषं विष्णुमीशं नमामि ॥

ॐ नमो भगवते वासुदेवाय ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं

वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥
मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं
कौस्तुभोद्भासिताङ्गम् । पुण्योपेतं
पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥
नमः समस्तभूतानां आदिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥
सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं
सरसीरुहेक्षणम् । सहारवक्षःस्थल शोभिकौस्तुभं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥ छायायां
पारिजातस्य हेमसिंहासनोपरि आसीनमम्बुद-
श्याममायताक्षमलङ्कृतम् ॥ चन्द्राननं चतुर्बाहुं
श्रीवत्साङ्कितवक्षसम् । रुक्मिणीसत्यभामाभ्यां
सहितं कृष्णं आश्रये ॥ *ॐ नमो नारायणाय ।*
ॐ नमो भगवते वासुदेवाय । ॐ विश्वस्मै नमः ।

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥१॥
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।

अवयय: पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥२॥
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥३॥
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥४॥
स्वयभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥५॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥६॥
अग्राह्यः शाश्वतः कृष्णो लोहिताक्ष प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥७॥
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥८॥
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥९॥
सुरेषः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥१०॥
अजः सर्वेश्वरः सिद्धः सिद्धिः सार्वादिरच्युतः ।

वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥११॥
वसुर्वसुमनाः सत्यः समात्मा(ऽ)सम्मितस्समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥१२॥
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतश्शाश्वतस्स्थाणुर्वरारोहो महातपाः ॥१३॥
सर्वगः सर्वविद्भानुर्विश्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥१४॥
लोकाध्यक्षस्सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूह-श्चतुर्दंष्ट्र-श्चतुर्भुजः ॥१५॥
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥१६॥
उपेन्द्रो वामनः प्रांशुः अमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥१७॥
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥१८॥
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥१९॥

महेश्वासो महीभर्ता श्रीनिवासः सतां-गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां-पतिः ॥२० ॥
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥२१ ॥

अमृत्युः सर्वदृक् सिह्मः सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥२२ ॥
गुरुः गुरुतमो धामः सत्य सत्यपराक्रमः ।
निमिषोऽनिमिषस्स्रग्वी वाचस्पतिरुदारधीः ॥२३ ॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥२४ ॥
आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥२५ ॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्-विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥२६ ॥
असङ्ख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थस्सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥२७ ॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥२८ ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥२९॥
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धस्स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥३०॥
अमृतांशूद्भवो भानुश्शशबिन्दुस्सुरेश्वरः ।
औषधं जगतस्सेतुः सत्यधर्मपराक्रमः ॥३१॥
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामः कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥३२॥
युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥३३॥
इष्टोऽविशिष्टश्शिष्टेष्टश्शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥३४॥
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपान्निधि रधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥३५॥
स्कन्दस्स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥३६॥
अशोकस्तारणस्तारश्शूरश्शौरिर्जनेश्वरः ।

अनुकूलश्शतावर्तः पद्मी पद्मनिभेक्षणः ॥३७॥
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥३८॥
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥३९॥
विक्षरो रोहितो मार्गो हेतुर्दामोदरस्सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥४०॥
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥४१॥
व्यवसायो व्यवस्थानस्संस्थानस्स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः ॥४२॥
रामो विरामो विरतो*(ज)* मार्गो नेयो नयोऽनयः ।
वीरश्शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥४३॥
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भश्शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥४४॥
ऋतुस्सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रस्संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥४५॥
विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।

अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥४६ ॥
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामस्समीहनः ॥४७ ॥
यज्ञ इज्यो महेज्यश्च क्रतुस्सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥४८ ॥
सुव्रतः सुमुखस्सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥४९ ॥
स्वापनस्स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥५० ॥
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुः विधाता कृतलक्षणः ॥५१ ॥
गभस्तिनेमिस्सत्त्वस्थस्सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥५२ ॥
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥५३ ॥
सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥५४ ॥
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।

अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥५५॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।

आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥५६॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।

त्रिपदस्त्रिदशाध्यक्षो महाश्रृङ्गः कृतान्तकृत् ॥५७॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।

गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥५८॥

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।

वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥५९॥

भगवान् भगहा नन्दी वनमाली हलायुधः ।

आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥६०॥

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।

दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥६१॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।

संन्यासकृच्छमश्शान्तो निष्ठा शान्तिः परायणम् ॥६२॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।

गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥६३॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥६४॥
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्रयाश्रयः ॥६५॥
स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥६६॥
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्स्थिरः ।
भूशयो भूषणो भूतिः विशोकः शोकनाशनः ॥६७॥
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥६८॥
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥६९॥
कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुः वीरोऽनन्तो धनञ्जयः ॥७०॥
ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥७१॥
महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥७२॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥७३॥
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥७४॥
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥७५॥
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदोऽदृप्तो दुर्धरोऽथापराजितः ॥७६॥
विश्वमूर्तिर्महामूर्तिः दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥७७॥
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥७८॥
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥७९॥
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥८०॥
तेजो वृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥८१॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥८२॥
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥८३॥
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥८४॥
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनःश्रृङ्गी जयन्तः सर्वविज्जयी ॥८५॥
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥८६॥
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥८७॥
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥८८॥
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥८९॥
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।

अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥९० ॥

भारभृत्कथितो योगी योगीशः सर्वकामदः ।

आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥९१ ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिताऽदमः ।

अपराजितः सर्वसहो नियन्ता नियमो यमः ॥९२ ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।

अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥९३ ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।

रविर्विरोचनः सूर्यः सविता रविलोचनः ॥९४ ॥

अनन्तोहुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।

अनिर्विण्णः सदामर्षी लोकधिष्ठानमद्भुतः ॥९५ ॥

सनात्सनातनतमः कपिलः कपिरव्ययः । स्वस्तिदः

स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥९६ ॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।

शद्बातिगः शद्बसहः शिशिरः शर्वरीकरः ॥९७ ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।

विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥९८ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।

वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥९९॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।

चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥१००॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।

जननो जनजन्मादिः भीमो भीमपराक्रमः ॥१०१॥

आधारनिलयो धाता पुष्पहासः प्रजागरः ।

ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥१०२॥

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।

तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥१०३॥

भूर्भुवः स्वस्तरुस्तारः सविता प्रपितामहः ।

यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥१०४॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।

यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥१०५॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।

देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥१०६॥

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।

रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥१०७॥

सर्वप्रहरणायुध ॐ नम इति ।

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।
श्रीमान् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥
श्रीवासुदेवोऽभिरक्षतु ॐ नम इति ॥१०८॥

फलश्रुतिः

इतीदं कीर्तनीयस्य केषवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानां अशेषेण प्रकीर्तितम् ॥१॥
य इदं श्रुणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥२॥
वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धन समृधः स्याद् शूद्रः सुखमवाप्नुयात् ॥३॥
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात् कामी प्रजार्थी चाप्नुयात् प्रजाः ॥४॥
भक्तिमान् यः सदोत्थाय शुचिस्तद्गत मानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत् ॥५॥
यशः प्राप्नोति विपुलम् ज्ञाति प्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥६॥
न भयं क्वचिताप्नोति वीर्यं तेजश्च विद्गति ।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ॥७॥

रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥८॥
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्ति समन्वितः ॥९॥
वासुदेव आश्रयो मर्त्यो वासुदेव परायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥१०॥
न वासुदेवभक्तानां अशुभं विद्यते क्वचित् ।
जन्म मृत्यु जरा व्याधि भयं नैवोपजायते ॥११॥
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिः श्रीधृतिस्मृतिकीर्तिभिः ॥१२॥
न क्रोधो न च मात्सर्यम् न लोभो नाशुभा मतिः ।
भवन्ति कृत पुण्याणां भक्तानां पुरुशोत्तमे ॥१३॥
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥१४॥
ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥१५॥
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।

वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥१६॥
सर्वागमानामाचारः प्रथमं परिकल्पितः ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥१७॥
ऋषयः पितरो देवाः महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥१८॥
योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादिकर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥१९॥
एको विष्णुर्महद्भूतं पृथक्भूतान्यनेकशः ।
त्रींल्लोकान् व्याप्य भूतात्मा भुङ्क्तेविश्वभुगव्ययः ॥२०॥
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥२१॥
विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥२२॥

॥ न ते यान्ति पराभवम् ॐ नम इति ॥

अर्जुन उवाच ।

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।
भक्तानां अनुरक्तानां त्राता भव जनार्दन ॥२३॥

श्रीभगवानुवाच ।

योमां नाम सहस्रेण स्तोतुमिच्छति पाण्डव ।
सोहऽमेकेन श्लोकेन स्तुत एव न संशयः ॥२४॥
स्तुत एव न संशय ॐ नम इति । *व्यास उवाच ।*
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते ॥२५॥
श्रीवासुदेव नमोऽस्तुत ॐ नम इति ।
पार्वत्युवाच - केनोपायेन लघुना
विष्णोर्नामसहस्रकम् । पठ्यते पण्डितैर्नित्यं
श्रोतुमिच्छाम्यहं प्रभो ॥२६॥ *ईश्वर उवाच* -
श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं राम नाम वरानने ॥२७॥
श्रीराम नाम वरानन ॐ नम इति ।
ब्रह्मोवाच - नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय
शाश्वते सहस्रकोटी युगधारिणे नमः ॥२८॥
सहस्रकोटी युगधारिण ॐ नम इति । सञ्जय उवाच -
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥२९॥

श्रीभगवानुवाच - अनन्याश्चिन्तयन्तो
मां ये जनाः पर्युपासते । तेषां
नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥३० ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥३१ ॥
आर्ताः विषण्णाः शिथिलाश्च भीताः ।
घोरेषु च व्याधिषु वर्तमानाः । सङ्कीर्त्य
नारायणशद्बमात्रं विमुक्तदुःखाः सुखिनो भवन्तु ॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा
प्रकृतेस्वभावात् । करोमि यद्यत् सकलं
परस्मै नारायणायेति समर्पयामि ॥३३ ॥
॥ इति श्रीविष्णोर्दिव्यसहस्त्रनामस्तोत्रं संपूर्णम् ॥

ॐॐॐ

॥ आपदुद्धारक स्तोत्रम् ॥

ॐ आपदामपहर्तारं धातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥
आर्तानामार्तिहन्तारं भीतानां भीतिनाशनम् ।
द्विषदां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ॥
सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन् मामग्रतो नित्यं रामः पातु सलक्ष्मणः ॥

नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
खण्डिताखिलदैत्याय रामायापन्निवारिणे ॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः॥

अच्युतानन्त गोविन्द नामोच्चारण भेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥

अच्युतानन्त गोविन्द विष्णो नारायणामृत ।
रोगान्मे नाशयाशेषान् आशु धन्वन्तरे हरे ॥

अच्युतानन्त गोविन्द विष्णो धन्वन्तरे हरे ।
वासुदेवाखिलानस्य रोगान् नाशय नाशय ॥

अच्युतानन्त गोविन्द सच्चिदानन्द शाश्वत ।
मच्चेतो रमतां नित्यं त्वच्चारु चरणाम्बुजे ॥

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥

श्रीकृष्ण विष्णो नृहरे मुरारे प्रद्युम्न
सङ्कर्षण वासुदेव । अजानिरुद्धामल
विश्वरूप त्वं पाहि नः सर्वभयादजस्रम् ॥

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥

जले विष्णुः स्थले विष्णुः विष्णुराकाशमुच्यते ।
स्थावरं जङ्गमं विष्णुः सर्वं विष्णुमयं जगत् ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्व पापेभ्यो मोक्षयिष्यामि मा शुचः ॥
सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात्परम् ॥
शरीरे जर्झरीभूते व्याधिग्रस्ते कलेबरे ।
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ।
आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणो हरिः ॥
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा
प्रकृतेस्वभावात् । करोमि यद्यत् सकलं
परस्मै नारायणायेति समर्पयामि ॥
यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।

तत्सर्वं क्षम्यतां देव **नारायण** नमोऽस्तु ते ॥

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च ।

न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम (*परमेश्वर*) ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

तस्मात् कारुण्य भावेन रक्ष रक्ष जनार्दन ॥

॥ ॐ तत् सत् ब्रह्मार्पणमस्तु ॥





॥ श्री लक्ष्म्यष्टोत्तर शत नाम स्तोत्रम् ॥ देव्युवाच -

देवदेव महादेव त्रिकालज्ञ महेश्वरः ।

करुणाकर देवेश भक्तानुग्रह कारक ।

अष्टोत्तर शतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ॥

ईश्वर उवाच -

देवि साधु महाभागे महाभाग्य प्रदायकम् ।
सर्वैश्वर्यकरं पुण्यं सर्वपापप्रणाशनम् ॥
सर्वदारिद्र्यशमनं श्रवणाद्भुक्तिमुक्तिदम् ।
राजवश्यकरं दिव्यं गुह्याद्गुह्यतरं परम् ॥
दुर्लभं सर्वदेवानां चतुष्षष्टिकलास्पदम् ।
पद्मादीनां नवानां च निधीनां नित्यदायकम् ॥
समस्तदेवसंसेव्यमणिमाद्यष्टसिद्धिदम् ।
किमत्र बहुनोक्तेन देवी प्रत्यक्षदायकम् ॥
तव प्रीत्याऽद्य वक्ष्यामि समाहितमनाश्शृणु ।
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता ॥
क्लीं बीजपदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अङ्गन्यासः करन्यासः स इत्यादि प्रकीर्तितः ॥
वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां ।
हस्ताभ्यां अभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ॥
भक्ताभीष्टफलप्रदां हरि हर ब्रह्मादिभिस्सेवितां ।
पार्श्वे पङ्कज शङ्ख पद्म निधिभिर्युक्तां

सदा शक्तिभिः ॥ सरसिजनयने सरोजहस्ते
धवलतरांशुकगन्धमाल्यशोभे । भगवति
हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीदमह्यम् ॥
प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम् ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ॥
वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम्।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ॥
अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम् ।
नमामि कमलां कान्तां कामां क्षीरोदसंभवाम् ॥
अनुग्रहप्रदां बुद्धिमनघां हरिवल्लभाम् ।
अशोकाममृतां दीप्तां लोकशोक विनाशिनीम् ॥
नमामि धर्मनिलयां करुणां लोकमातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुद्वरीम् ।
पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीम् ॥
पुण्यगन्धां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् ।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीम् ॥

चतुर्भुजां चन्द्ररूपाम् इन्दिरां इन्दुशीतलाम् ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥
विमलां विश्वजननीं पुष्टिं दारिद्र्यनाशिनीम् ।
प्रीतिपुष्करणीं शान्तां शुक्लमाल्याम्बरां श्रियम् ॥
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् ।
वसुन्धरामुदाराङ्गां हरिणीं हेममालिनीम् ॥
धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम् ।
नृपवेश्म-गतानन्दां वरलक्ष्मीं वसुप्रदाम् ॥
शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मङ्गलादेवीं विष्णु-वक्षस्थल-स्थिताम् ॥
विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रिताम् ।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रव-वारिणीम् ॥
नवदुर्गां महाकालीं ब्रह्माविष्णु-शिवात्मिकाम् ।
त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीम् ॥
लक्ष्मीं क्षीरसमुद्राजतनयां श्रीरङ्गधामेश्वरीम्
दासीभूतसमस्तदेववनितां लोकैकदीपाङ्कुराम् ।

श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां त्वां
त्रैलोक्यकुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥
मातर्नमामि कमले कमलायताक्षी
श्रीविष्णुहृत्कमलवासिनि विश्वमातः ।
क्षीरोदजे कमलकोमलगर्भगौरि लक्ष्मी
प्रसीद सततं नमतां शरण्ये ॥
त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेन्द्रियः ।
दारिद्र्यध्वंसनं कृत्वा सर्वमाप्नोति यत्नतः ॥
देवीनामसहस्रेषु पुण्यमष्टोत्तरं शतम् ।
येन श्रियमवाप्नोति दरिद्रः कोटिजन्मसु ॥
भृगुवारे शतं धीमान् पठेद्वत्सरमात्रकम् ।
अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले ॥
दारिद्र्यमोचनं नाम स्तोत्रं अम्बापरं शतम् ।
येन श्रियमवाप्नोति कोटिजन्म दरिद्रतः ॥
भुक्त्वा तु विपुलान् भोगानस्यास्सायुज्यमाप्नुयात् ॥
प्रातः काले पठेन्नित्यं सर्वदुःखोपशान्तये ।
पठंस्तु चिन्त्येधेवीं सर्वाभरणभूषिताम् ॥

॥ श्री लक्ष्म्यष्टोत्तर शतनाम स्तोत्रं समाप्तम् ॥

त्रियुगि नारायण् – गुप्तकाशि

॥ श्रीविष्णु सहस्रनामावली ॥

॥ श्री गणेशाय नमः ॥

॥ ध्यानम् ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

॥ अथ श्री विष्णु सहस्रनामावली ॥

१ ॐ विश्वस्मै नमः ।

२ ॐ विष्णवे नमः ।

३ ॐ वषट्काराय नमः ।

४ ॐ भूतभव्यभवत्प्रभवे नमः ।

५ ॐ भूतकृते नमः ।

६ ॐ भूतभृते नमः ।

७ ॐ भावाय नमः।

८ ॐ भूतात्मने नमः ।

९ ॐ भूतभावनाय नमः ।

१० ॐ पूतात्मने नमः ।

११ ॐ परमात्मने नमः ।

१२ ॐ मुक्तानां परमायै गतये नमः ।

१३ ॐ अव्ययाय नमः ।

१४ ॐ पुरुषाय नमः ।

१५ ॐ साक्षिणे नमः ।

१६ ॐ क्षेत्रज्ञाय नमः ।

१७ ॐ अक्षराय नमः ।

१८ ॐ योगाय नमः ।

१९ ॐ योगविधां नेत्रे नमः ।

२० ॐ प्रधानपुरुषेश्वराय नमः ।

२१ ॐ नारसिंहवपुशे नमः ।

२२ ॐ श्रीमते नमः ।

२३ ॐ केशवाय नमः ।

२४ ॐ पुरुषोत्तमाय नमः ।

२५ ॐ सर्वस्मै नमः ।

२६ ॐ शर्वाय नमः ।

२७ ॐ शिवाय नमः ।

२८ ॐ स्थाणवे नमः ।

२९ ॐ भूतादये नमः ।

३० ॐ निधयेऽव्ययाय नमः ।

३१ ॐ सम्भावाय नमः ।

३२ ॐ भावनाय नमः ।

३३ ॐ भर्त्रे नमः ।

३४ ॐ प्रभवाय नमः ।

३५ ॐ प्रभवे नमः ।

३६ ॐ ईश्वराय नमः ।

३७ ॐ स्वयम्बुवे नमः ।

३८ ॐ शम्भवे नमः ।

३९ ॐ आदित्याय नमः ।

४० ॐ पुष्कराक्षाय नमः ।

४१ ॐ महास्वनाय नमः ।

४२ ॐ अनादिनिधनाय नमः ।

४३ ॐ धात्रे नमः ।

४४ ॐ विधात्रे नमः ।

४५ ॐ धातुरुत्तमाय *(धातव उत्तमाय)* नमः ।

४५ ॐ अप्रमेयाय नमः ।

४७ ॐ हृषीकेशाय नमः ।

४८ ॐ पद्मनाभाय नमः ।

४९ ॐ अमरप्रभवे नमः ।

५० ॐ विश्वकर्मणे नमः ।

५१ ॐ मनवे नमः ।

५२ ॐ त्वष्ट्रे नमः ।

५३ ॐ स्थविष्ठाय नमः ।

५४ ॐ स्थविराय ध्रुवाय नमः ।

५५ ॐ अग्राह्याय नमः ।

५६ ॐ शाश्वथाय नमः ।

५७ ॐ कृष्णाय नमः ।

५८ ॐ लोहिताक्षाय नमः ।

५९ ॐ प्रतर्दनाय नमः ।

६० ॐ प्रभूताय नमः ।

६१ ॐ त्रिककुब्धाम्ने नमः ।

६२ ॐ पवित्राय नमः ।

६३ ॐ मङ्गलाय परस्मै नमः ।

६४ ॐ ईशानाय नमः ।

६५ ॐ प्राणदाय नमः ।

६६ ॐ प्राणाय नमः ।

६७ ॐ ज्येष्ठाय नमः ।

६८ ॐ श्रेष्ठाय नमः ।

६९ ॐ प्रजापतये नमः ।

७० ॐ हिरण्यगर्भाय नमः ।

७१ ॐ भूगर्भाय नमः ।

७२ ॐ माधवाय नमः ।

७३ ॐ मधुसूदनाय नमः ।

७४ ॐ ईश्वराय नमः । *(see 36)*

७५ ॐ विक्रमिणे नमः ।

७६ ॐ धन्विने नमः ।

७७ ॐ मेधाविने नमः ।

७८ ॐ विक्रमाय नमः ।

७९ ॐ क्रमाय नमः ।

८० ॐ अनुत्तमाय नमः ।

८१ ॐ दुराधर्षाय नमः ।

८२ ॐ कृतज्ञाय नमः ।

८३ ॐ कृतये नमः ।

८४ ॐ आत्मवते नमः ।

८५ ॐ सुरेशाय नमः ।

८६ ॐ शरणाय नमः ।

८७ ॐ शर्मणे नमः ।

८८ ॐ विश्वरेतसे नमः ।

८९ ॐ प्रजाभवाय नमः ।

९० ॐ अह्ने नमः ।

९१ ॐ संवत्सराय नमः ।

९२ ॐ व्यालाय नमः ।

९३ ॐ प्रत्ययाय नमः ।

९४ ॐ सर्वदर्शनाय नमः ।

९५ ॐ अजाय नमः ।

९६ ॐ सर्वेश्वराय नमः ।

९७ ॐ सिद्धाय नमः ।

९८ ॐ सिद्धये नमः ।

९९ ॐ सर्वादवे नमः ।

१०० ॐ अच्युताय नमः ।

१०१ ॐ वृषाकपये नमः ।

१०२ ॐ अमेयात्मने नमः ।

१०३ ॐ सर्वयोगविनिःसृताय नमः ।

१०४ ॐ वसवे नमः ।

१०५ ॐ वसुमनसे नमः ।

१०६ ॐ सत्याय नमः ।

१०७ ॐ समात्मने नमः ।

१०८ ॐ असम्मिताय नमः ।

१०९ ॐ समाय नमः ।

११० ॐ अमोघाय नमः ।

१११ ॐ पुण्डरीकाक्षाय नमः ।

११२ ॐ वृषकर्मणे नमः ।

११३ ॐ वृषाकृतये नमः ।

११४ ॐ रुद्राय नमः ।

११५ ॐ बहुशिरसे नमः ।

११६ ॐ बभ्रवे नमः ।

११७ ॐ विश्वयोनये नमः ।

११८ ॐ शुचिश्रवसे नमः ।

११९ ॐ अमृताय नमः ।

१२० ॐ शाश्वतस्थाणवे नमः ।

१२१ ॐ वरारोहाय नमः ।

१२२ ॐ महातपसे नमः ।

१२३ ॐ सर्वगाय नमः ।

१२४ ॐ सर्वविद्भानवे नमः ।

१२५ ॐ विष्वक्सेनाय नमः ।

१२६ ॐ जनार्दनाय नमः ।

१२७ ॐ वेदाय नमः ।

१२८ ॐ वेदविदे नमः ।

१२९ ॐ अव्यङ्गाय नमः ।

१३० ॐ वेदाङ्गाय नमः ।

१३१ ॐ वेदविदे नमः । *(see 128)*

१३२ ॐ कवये नमः ।

१३३ ॐ लोकाध्यक्षाय नमः ।

१३४ ॐ सुराध्यक्षाय नमः ।

१३५ ॐ धर्माध्यक्षाय नमः ।

१३६ ॐ कृताकृताय नमः ।

१३७ ॐ चतुरात्मने नमः ।

१३८ ॐ चतुर्व्यूहाय नमः ।

१३९ ॐ चतुर्दंष्ट्राय नमः ।

१४० ॐ चतुर्भुजाय नमः ।

१४१ ॐ भ्राजिष्णवे नमः ।

१४२ ॐ भोजनाय नमः ।

१४३ ॐ भोक्त्रे नमः ।

१४४ ॐ सहिष्णवे नमः ।

१४५ ॐ जगदादिजाय नमः ।

१४६ ॐ अनघाय नमः ।

१४७ ॐ विजयाय नमः ।

१४८ ॐ जेत्रे नमः ।

१४९ ॐ विश्वयोनये नमः । *(see 117)*

१५० ॐ पुनर्वसवे नमः ।

१५१ ॐ उपेन्द्राय नमः ।

१५२ ॐ वामनाय नमः ।

१५३ ॐ प्रांशवे नमः ।

१५४ ॐ अमोघाय नमः । *(see 110)*

१५५ ॐ शुचये नमः ।

१५६ ॐ ऊर्जिताय नमः ।

१५७ ॐ अतीन्द्राय नमः ।

१५८ ॐ सङ्ग्रहाय नमः ।

१५९ ॐ सर्गाय नमः ।

१६० ॐ धृतात्मने नमः ।

१६१ ॐ नियमाय नमः ।

१६२ ॐ यमाय नमः ।

१६३ ॐ वेद्याय नमः ।

१६४ ॐ वैद्याय नमः ।

१६५ ॐ सदायोगिने नमः ।

१६६ ॐ वीरघ्ने नमः ।

१६७ ॐ माधवाय नमः । *(see 72)*

१६८ ॐ मधवे नमः ।

१६९ ॐ अतीन्द्रियाय नमः ।

१७० ॐ महामायाय नमः ।

१७१ ॐ महोत्साहाय नमः ।

१७२ ॐ महाबलाय नमः ।

१७३ ॐ महाबुद्धये नमः ।

१७४ ॐ महावीर्याय नमः ।

१७५ ॐ महाशक्तये नमः ।

१७६ ॐ महाद्युतये नमः ।

१७७ ॐ अनिर्देश्यवपुषे नमः ।

१७८ ॐ श्रीमते नमः । *(see 22)*

१७९ ॐ अमेयात्मने नमः ।

१८० ॐ महाद्रिधृषे नमः ।

१८१ ॐ महेष्वासाय नमः ।

१८२ ॐ महीभर्त्रे नमः ।

१८३ ॐ श्रीनिवासाय नमः ।

१८४ ॐ सतां गतये नमः ।

१८५ ॐ अनिरुद्धाय नमः ।

१८६ ॐ सुरानन्दाय नमः ।

१८७ ॐ गोविन्दाय नमः ।

१८८ ॐ गोविदां पतये नमः ।

१८९ ॐ मरीचये नमः ।

१९० ॐ दमनाय नमः ।

१९१ ॐ हंसाय नमः ।

१९२ ॐ सुपर्णाय नमः ।

१९३ ॐ भुजगोत्तमाय नमः ।

१९४ ॐ हिरण्यनाभाय नमः ।

१९५ ॐ सुतपसे नमः ।

१९६ ॐ पद्मनाभाय नमः । *(see 48)*

१९७ ॐ प्रजापतये नमः । *(see 69)*

१९८ ॐ अमृत्यवे नमः ।

१९९ ॐ सर्वदृशे नमः ।

२०० ॐ सिंहाय नमः ।

२०१ ॐ सन्धात्रे नमः ।

२०२ ॐ सन्धिमते नमः ।

२०३ ॐ स्थिराय नमः ।

२०४ ॐ अजाय नमः । *(see 95)*

२०५ ॐ दुर्मर्षणाय नमः ।

२०६ ॐ शास्त्रे नमः ।

२०७ ॐ विश्रुतात्मने नमः ।

२०८ ॐ सुरारिघ्ने नमः ।

२०९ ॐ गुरवे नमः ।

२१० ॐ गुरुतमाय नमः ।

२११ ॐ धाम्ने नमः ।

२१२ ॐ सत्याय नमः । *(see 106)*

२१३ ॐ सत्यपराक्रमाय नमः ।

२१४ ॐ निमिषाय नमः ।

२१५ ॐ अनिमिषाय नमः ।

२१६ ॐ स्रग्विणे नमः ।

२१७ ॐ वाचस्पतये उदारधिये नमः ।

२१८ ॐ अग्रण्ये नमः ।

२१९ ॐ ग्रामण्ये नमः ।

२२० ॐ श्रीमते नमः । *(see 22, 178)*

२२१ ॐ न्यायाय नमः ।

२२२ ॐ नेत्रे नमः ।

२२३ ॐ समीरणाय नमः ।

२२४ ॐ सहस्रमूर्ध्ने नमः ।

२२५ ॐ विश्वात्मने नमः ।

२२६ ॐ सहस्राक्षाय नमः ।

२२७ ॐ सहस्रपदे नमः ।

२२८ ॐ आवर्तनाय नमः ।

२२९ ॐ निवृत्तात्मने नमः ।

२३० ॐ संवृताय नमः ।

२३१ ॐ सम्प्रमर्दनाय नमः ।

२३२ ॐ अहःसंवर्तकाय नमः ।

२३३ ॐ वह्नये नमः ।

२३४ ॐ अनिलाय नमः ।

२३५ ॐ धरणीधराय नमः ।

२३६ ॐ सुप्रसादाय नमः ।

२३७ ॐ प्रसन्नात्मने नमः ।

२३८ ॐ विश्वधृषे नमः ।

२३९ ॐ विश्वभुजे नमः ।

२४० ॐ विभवे नमः ।

२४१ ॐ सत्कर्त्रे नमः ।

२४२ ॐ सत्कृताय नमः ।

२४३ ॐ साधवे नमः ।

२४४ ॐ जह्नवे नमः ।

२४५ **ॐ नारायणाय नमः** ।

२४६ ॐ नराय नमः ।

२४७ ॐ असङ्ख्येयाय नमः ।

२४८ ॐ अप्रमेयात्मने नमः ।

२४९ ॐ विशिष्टाय नमः ।

२५० ॐ शिष्टकृते नमः ।

२५१ ॐ शुचये नमः । *(see 155)*

२५२ ॐ सिद्धार्थाय नमः ।

२५३ ॐ सिद्धसङ्कल्पाय नमः ।

२५४ ॐ सिद्धिदाय नमः ।

२५५ ॐ सिद्धिसाधनाय नमः ।

२५६ ॐ वृषाहिणे नमः ।

२५७ ॐ वृषभाय नमः ।

२५८ ॐ विष्णवे नमः । *(see 2)*

२५९ ॐ वृषपर्वणे नमः ।

२६० ॐ वृषोदराय नमः ।

२६१ ॐ वर्धनाय नमः ।

२६२ ॐ वर्धमानाय नमः ।

२६३ ॐ विविक्ताय नमः ।

२६४ ॐ श्रुतिसागराय नमः ।

२६७ ॐ सुभुजाय नमः ।

२६६ ॐ दुर्धराय नमः ।

२६७ ॐ वाग्मिने नमः ।

२६८ ॐ महेन्द्राय नमः ।

२६९ ॐ वसुदाय नमः ।

२७० ॐ वसवे नमः । *(see 104)*

२७१ ॐ नैकरूपाय नमः ।

२७२ ॐ बृहद्रूपाय नमः ।

२७३ ॐ शिपिविष्टाय नमः ।

२७४ ॐ प्रकाशनाय नमः ।

२७५ ॐ ओजस्तेजोद्युतिधराय नमः ।

२७६ ॐ प्रकाशात्मने नमः ।

२७७ ॐ प्रतापनाय नमः ।

२७८ ॐ ऋद्धाय नमः ।

२७९ ॐ स्पष्टाक्षराय नमः ।

२८० ॐ मन्त्राय नमः ।

२८१ ॐ चन्द्रांशवे नमः ।

२८२ ॐ भास्करद्युतये नमः ।

२८३ ॐ अमृतांशूद्भवाय नमः ।

२८४ ॐ भानवे नमः ।

२८५ ॐ शशबिन्दवे नमः ।

२८६ ॐ सुरेश्वराय नमः ।

२८७ ॐ औषधाय नमः ।

२८८ ॐ जगतः सेतवे नमः ।

२८९ ॐ सत्यधर्मपराक्रमाय नमः ।

२९० ॐ भूतभव्यभवन्नाथाय नमः ।

२९१ ॐ पवनाय नमः ।

२९२ ॐ पावनाय नमः ।

२९३ ॐ अनलाय नमः ।

२९४ ॐ कामघ्ने नमः ।

२९५ ॐ कामकृते नमः ।

२९६ ॐ कान्ताय नमः ।

२९७ ॐ कामाय नमः ।

२९८ ॐ कामप्रदाय नमः ।

२९९ ॐ प्रभवे नमः । *(see 35)*

३०० ॐ युगादिकृते नमः ।

३०१ ॐ युगावर्ताय नमः ।

३०२ ॐ नैकमायाय नमः ।

३०३ ॐ महाशनाय नमः ।

३०४ ॐ अदृश्याय नमः ।

३०५ ॐ अव्यक्तरूपाय नमः ।

३०६ ॐ सहस्रजिते नमः ।

३०७ ॐ अनन्तजिते नमः ।

३०८ ॐ इष्टाय नमः ।

३०९ ॐ अविशिष्टाय नमः । *(see 249)*

३१० ॐ शिष्टेष्टाय नमः ।

३११ ॐ शिखण्डिने नमः ।

३१२ ॐ नहुषाय नमः ।

३१३ ॐ वृषाय नमः ।

३१४ ॐ क्रोधघ्ने नमः ।

३१५ ॐ क्रोधकृत्कर्त्रे नमः ।

३१६ ॐ विश्वबाहवे नमः ।

३१७ ॐ महीधराय नमः ।

३१८ ॐ अच्युताय नमः । *(see 100)*

३१९ ॐ प्रथिताय नमः ।

३२० ॐ प्राणाय नमः । *(see 66)*

३२१ ॐ प्राणदाय नमः । *(see 65)*

३२२ ॐ वासवानुजाय नमः ।

३२३ ॐ अपां निधये नमः ।

३२४ ॐ अधिष्ठानाय नमः ।

३२५ ॐ अप्रमत्ताय नमः ।

३२६ ॐ प्रतिष्ठिताय नमः ।

३२७ ॐ स्कन्दाय नमः ।

३२८ ॐ स्कन्दधराय नमः ।

३२९ ॐ धुर्याय नमः ।

३३० ॐ वरदाय नमः ।

३३१ ॐ वायुवाहनाय नमः ।

३३२ ॐ वासुदेवाय नमः ।

३३३ ॐ बृहद्भानवे नमः ।

३३४ ॐ आदिदेवाय नमः ।

३३५ ॐ पुरन्दराय नमः ।

३३६ ॐ अशोकाय नमः ।

३३७ ॐ तारणाय नमः ।

३३८ ॐ ताराय नमः ।

३३९ ॐ शूराय नमः ।

३४० ॐ शौरये नमः ।

३४१ ॐ जनेश्वराय नमः ।

३४२ ॐ अनुकूलाय नमः ।

३४३ ॐ शतावर्ताय नमः ।

३४४ ॐ पद्मिने नमः ।

३४५ ॐ पद्मनिभेक्षणाय नमः ।

३४६ **ॐ पद्मनाभाय** नमः । *(see 48, 196)*

३४७ ॐ अरविन्दाक्षाय नमः ।

३४८ ॐ पद्मगर्भाय नमः ।

३४९ ॐ शरीरभृते नमः ।

३५० ॐ महर्द्धये नमः ।

३५१ ॐ ऋद्धाय नमः । *(see 278)*

३५२ ॐ वृद्धात्मने नमः ।

३५३ ॐ महाक्षाय नमः ।

३५४ ॐ गरुडध्वजाय नमः ।

३५५ ॐ अतुलाय नमः ।

३५६ ॐ शरभाय नमः ।

३५७ ॐ भीमाय नमः ।

३५८ ॐ समयज्ञाय नमः ।

३५९ ॐ हविर्हरये नमः ।

३६० ॐ सर्वलक्षणलक्षण्याय नमः ।

३६१ ॐ लक्ष्मीवते नमः ।

३६२ ॐ समितिञ्जयाय नमः ।

३६३ ॐ विक्षराय नमः ।

३६४ ॐ रोहिताय नमः ।

३६५ ॐ मार्गाय नमः ।

३६६ ॐ हेतवे नमः ।

३६७ ॐ दामोदराय नमः ।

३६८ ॐ सहाय नमः ।

३६९ ॐ महीधराय नमः । *(see 317)*

३७० ॐ महाभागाय नमः ।

३७१ ॐ वेगवते नमः ।

३७२ ॐ अमिताशनाय नमः ।

३७३ ॐ उद्भवाय नमः ।

३७४ ॐ क्षोभणाय नमः ।

३७५ ॐ देवाय नमः ।

३७६ ॐ श्रीगर्भाय नमः ।

३७७ ॐ परमेश्वराय नमः ।

३७८ ॐ करणाय नमः ।

३७९ ॐ कारणाय नमः ।

३८० ॐ कर्त्रे नमः ।

३८१ ॐ विकर्त्रे नमः ।

३८२ ॐ गहनाय नमः ।

३८३ ॐ गुहाय नमः ।

३८४ ॐ व्यवसायाय नमः ।

३८५ ॐ व्यवस्थानाय नमः ।

३८६ ॐ संस्थानाय नमः ।

३८७ ॐ स्थानदाय नमः ।

३८८ ॐ ध्रुवाय नमः ।

३८९ ॐ परर्द्धये नमः ।

३९०अ ॐ कृष्णाय नमः ।

३९० ॐ परमस्पष्टाय नमः ।

३९१ ॐ तुष्टाय नमः ।

३९२ ॐ पुष्टाय नमः ।

३९३ ॐ शुभेक्षणाय नमः ।

३९४ ॐ रामाय नमः ।

३९५ ॐ विरामाय नमः ।

३९६ ॐ विरताय नमः ।

३९७ ॐ मार्गाय नमः । *(see 365)*

३९८ ॐ नेयाय नमः ।

३९९ ॐ नयाय नमः ।

४०० ॐ अनयाय नमः ।

४०१ ॐ वीराय नमः ।

४०२ ॐ शक्तिमतां श्रेष्ठाय नमः ।

४०३ ॐ धर्माय नमः ।

४०४ ॐ धर्मविदुत्तमाय नमः ।

४०५ ॐ वैकुण्ठाय नमः ।

४०६ ॐ पुरुषाय नमः ।

४०७ ॐ प्राणाय नमः ।

४०८ ॐ प्राणदाय नमः ।

४०९ ॐ प्रणवाय नमः ।

४१० ॐ पृथवे नमः ।

४११ ॐ हिरण्यगर्भाय नमः ।

४१२ ॐ शत्रुघ्नाय नमः ।

४१३ ॐ व्याप्ताय नमः ।

४१४ ॐ वायवे नमः ।

४१५ ॐ अधोक्षजाय नमः ।

४१६ ॐ ऋतवे नमः ।

४१७ ॐ सुदर्शनाय नमः ।

४१८ ॐ कालाय नमः ।

४१९ ॐ परमेष्ठिने नमः ।

४२० ॐ परिग्रहाय नमः ।

४२१ ॐ उग्राय नमः ।

४२२ ॐ संवत्सराय नमः । *(see 91)*

४२३ ॐ दक्षाय नमः ।

४२४ ॐ विश्रामाय नमः ।

४२५ ॐ विश्वदक्षिणाय नमः ।

४२६ ॐ विस्ताराय नमः ।

४२७ ॐ स्थावरस्थाणवे नमः ।

४२८ ॐ प्रमाणाय नमः ।

४२९ ॐ बीजायाव्ययाय नमः ।

४३० ॐ अर्थाय नमः ।

४३१ ॐ अनर्थाय नमः ।

४३२ ॐ महाकोशाय नमः ।

४३३ ॐ महाभोगाय नमः ।

४३४ ॐ महाधनाय नमः ।

४३५ ॐ अनिर्विण्णाय नमः ।

४३६ ॐ स्थविष्ठाय नमः । *(see 53)*

४३७ ॐ अभुवे नमः ।

४३८ ॐ धर्मयूपाय नमः ।

४३९ ॐ महामखाय नमः ।

४४० ॐ नक्षत्रनेमये नमः ।

४४१ ॐ नक्षत्रिणे नमः ।

४४२ ॐ क्षमाय नमः ।

४४३ ॐ क्षामाय नमः ।

४४४ ॐ समीहनाय नमः ।

४४५ ॐ यज्ञाय नमः ।

४४६ ॐ इज्याय नमः ।

४४७ ॐ महेज्याय नमः ।

४४८ ॐ क्रतवे नमः ।

४४९ ॐ सत्राय नमः ।

४५० ॐ सतां गतये नमः । *(see 184)*

४५१ ॐ सर्वदर्शिने नमः ।

४५२ ॐ विमुक्तात्मने नमः ।

४५३ ॐ सर्वज्ञाय नमः ।

४५४ ॐ ज्ञानयोत्तमाय नमः ।

४५५ ॐ सुव्रताय नमः ।

४५६ ॐ सुमुखाय नमः ।

४५७ ॐ सूक्ष्माय नमः ।

४५८ ॐ सुघोषाय नमः ।

४५९ ॐ सुखदाय नमः ।

४६० ॐ सुहृदे नमः ।

४६१ ॐ मनोहराय नमः ।

४६२ ॐ जितक्रोधाय नमः ।

४६३ ॐ वीरबाहवे नमः ।

४६४ ॐ विदारणाय नमः ।

४६५ ॐ स्वापनाय नमः ।

४६६ ॐ स्ववशाय नमः ।

४६७ ॐ व्यापिने नमः ।

४६८ ॐ नैकात्मने नमः ।

४६९ ॐ नैककर्मकृते नमः ।

४७० ॐ वत्सराय नमः ।

४७१ ॐ वत्सलाय नमः ।

४७२ ॐ वत्सिने नमः ।

४७३ ॐ रत्नगर्भाय नमः ।

४७४ ॐ धनेश्वराय नमः ।

४७५ ॐ धर्मगुपे नमः ।

४७६ ॐ धर्मकृते नमः ।

४७७ ॐ धर्मिणे नमः ।

४७८ ॐ सते नमः ।

४७९ ॐ असते नमः ।

४८० ॐ क्षराय नमः ।

४८१ ॐ अक्षराय नमः । *(see 17)*

४८२ ॐ अविज्ञात्रे नमः ।

४८३ ॐ सहस्रांशवे नमः ।

४८४ ॐ विधात्रे नमः । *(see 44)*

४८५ ॐ कृतलक्षणाय नमः ।

४८६ ॐ गभस्तिनेमये नमः ।

४८७ ॐ सत्त्वस्थाय नमः ।

४८८ ॐ सिंहाय नमः । *(see 200)*

४८९ ॐ भूतमहेश्वराय नमः ।

४९० ॐ आदिदेवाय नमः । *(see 304)*

४९१ ॐ महादेवाय नमः ।

४९२ ॐ देवेशाय नमः ।

४९३ ॐ देवभृद्गुरवे नमः ।

४९४ ॐ उत्तराय नमः ।

४९५ ॐ गोपतये नमः ।

४९६ ॐ गोप्त्रे नमः ।

४९७ ॐ ज्ञानगम्याय नमः ।

४९८ ॐ पुरातनाय नमः ।

४९९ ॐ शरीरभूतभृते नमः ।

५०० ॐ भोक्त्रे नमः । *(see 143)*

५०१ ॐ कपीन्द्राय नमः ।

५०२ ॐ भूरिदक्षिणाय नमः ।

५०३ ॐ सोमपाय नमः ।

५०४ ॐ अमृतपाय नमः ।

५०५ ॐ सोमाय नमः ।

५०६ ॐ पुरुजिते नमः ।

५०७ ॐ पुरुसत्तमाय नमः ।

५०८ ॐ विनयाय नमः ।

५०९ ॐ जयाय नमः ।

५१० ॐ सत्यसन्धाय नमः ।

५११ ॐ दाशार्हाय नमः ।

५१२ ॐ सात्वतां पतये नमः ।

५१३ ॐ जीवाय नमः ।

५१४ ॐ विनयितासाक्षिणे नमः ।

५१५ ॐ मुकुन्दाय नमः ।

५१६ ॐ अमितविक्रमाय नमः ।

५१७ ॐ अम्भोनिधये नमः ।

५१८ ॐ अनन्तात्मने नमः ।

५१९ ॐ महोदधिशयाय नमः ।

५२० ॐ अन्तकाय नमः ।

५२१ ॐ अजाय नमः । *(see 95, 204)*

५२२ ॐ महार्हाय नमः ।

५२३ ॐ स्वाभाव्याय नमः ।

५२४ ॐ जितामित्राय नमः ।

५२५ ॐ प्रमोदनाय नमः ।

५२६ ॐ आनन्दाय नमः ।

५२७ ॐ नन्दनाय नमः ।

५२८ ॐ नन्दाय नमः ।

५२९ ॐ सत्यधर्मणे नमः ।

५३० ॐ त्रिविक्रमाय नमः ।

५३१ ॐ महर्षये कपिलाचार्याय नमः ।

५३२ ॐ कृतज्ञाय नमः । *(see 82)*

५३३ ॐ मेदिनीपतये नमः ।

५३४ ॐ त्रिपदाय नमः ।

५३५ ॐ त्रिदशाध्यक्षाय नमः ।

५३६ ॐ महाश्रृङ्गाय नमः ।

५३७ ॐ कृतान्तकृते नमः ।

५३८ ॐ महावराहाय नमः ।

५३९ ॐ गोविन्दाय नमः । *(see 187)*

५४० ॐ सुषेणाय नमः ।

५४१ ॐ कनकाङ्गदिने नमः ।

५४२ ॐ गुह्याय नमः ।

५४३ ॐ गभीराय नमः ।

५४४ ॐ गहनाय नमः । *(see 382)*

५४५ ॐ गुप्ताय नमः ।

५४६ ॐ चक्रगदाधराय नमः ।

५४७ ॐ वेधसे नमः ।

५४८ ॐ स्वाङ्गाय नमः ।

५४९ ॐ अजिताय नमः ।

५५० ॐ कृष्णाय नमः । *(see 57)*

५५१ ॐ दृढाय नमः ।

५५२ ॐ सङ्कर्षणायाच्युताय नमः ।

५५३ ॐ वरुणाय नमः ।

५५४ ॐ वारुणाय नमः ।

५५५ ॐ वृक्षाय नमः ।

५५६ ॐ पुष्कराक्षाय नमः । *(see 40)*

५५७ ॐ महामनसे नमः ।

५५८ ॐ भगवते नमः ।

५५९ ॐ भगघ्ने नमः ।

५६० ॐ आनन्दिने नमः ।

५६१ ॐ वनमालिने नमः ।

५६२ ॐ हलायुधाय नमः ।

५६३ ॐ आदित्याय नमः । *(see 334)*

५६४ ॐ ज्योतिरादित्याय नमः ।

५६५ ॐ सहिष्णुवे नमः ।

५६६ ॐ गतिसत्तमाय नमः ।

५६७ ॐ सुधन्वने नमः ।

५६८ ॐ खण्डपरशवे नमः ।

५६९ ॐ दारुणाय नमः ।

५७० ॐ द्रविणप्रदाय नमः ।

५७१ ॐ दिवस्पृशे नमः ।

५७२ ॐ सर्वदृग्व्यासाय नमः ।

५७३ ॐ वाचस्पतये अयोनिजाय नमः ।

५७४ ॐ त्रिसाम्ने नमः ।

५७५ ॐ सामगाय नमः ।

५७६ ॐ साम्ने नमः ।

५७७ ॐ निर्वाणाय नमः ।

५७८ ॐ भेषजाय नमः ।

५७९ ॐ भिषजे नमः ।

५८० ॐ सन्न्यासकृते नमः ।

५८१ ॐ शमाय नमः ।

५८२ ॐ शान्ताय नमः ।

५८३ ॐ निष्ठायै नमः ।

५८४ ॐ शान्त्यै नमः ।

५८५ ॐ परायणाय नमः ।

५८६ ॐ शुभाङ्गाय नमः ।

५८७ ॐ शान्तिदाय नमः ।

५८८ ॐ स्रष्ट्रे नमः ।

५८९ ॐ कुमुदाय नमः ।

५९० ॐ कुवलेशयाय नमः ।

५९१ ॐ गोहिताय नमः ।

५९२ ॐ गोपतये नमः । *(see 495)*

५९३ ॐ गोप्त्रे नमः । *(see 496)*

५९४ ॐ वृषभाक्षाय नमः ।

५९५ ॐ वृषप्रियाय नमः ।

५९६ ॐ अनिवर्तिने नमः ।

५९७ ॐ निवृत्तात्मने नमः । *(see 229)*

५९८ ॐ सङ्क्षेप्त्रे नमः ।

५९९ ॐ क्षेमकृते नमः ।

६०० ॐ शिवाय नमः । *(see 27)*

६०१ ॐ श्रीवत्सवक्षसे नमः ।

६०२ ॐ श्रीवासाय नमः ।

६०३ ॐ श्रीपतये नमः ।

६०४ ॐ श्रीमतां वराय नमः ।

६०५ ॐ श्रीदाय नमः ।

६०६ ॐ श्रीशाय नमः ।

६०७ ॐ श्रीनिवासाय नमः । *(see 183)*

६०८ ॐ श्रीनिधये नमः ।

६०९ ॐ श्रीविभावनाय नमः ।

६१० ॐ श्रीधराय नमः ।

६११ ॐ श्रीकराय नमः ।

६१२ ॐ श्रेयसे नमः ।

६१३ ॐ श्रीमते नमः । *(see 22, 178, 220)*

६१४ ॐ लोकत्रयाश्रयाय नमः ।

६१५ ॐ स्वक्षाय नमः ।

६१६ ॐ स्वङ्गाय नमः । *(see 548)*

६१७ ॐ शतानन्दाय नमः ।

६१८ ॐ नन्दये नमः ।

६१९ ॐ ज्योतिर्गणेश्वराय नमः ।

६२० ॐ विजितात्मने नमः ।

६२१ ॐ अविधेयात्मने नमः ।

६२२ ॐ सत्कीर्तये नमः ।

६२३ ॐ छिन्नसंशयाय नमः ।

६२४ ॐ उदीर्णाय नमः ।

६२५ ॐ सर्वतश्चक्षुषे नमः ।

६२६ ॐ अनीशाय नमः ।

६२७ ॐ शाश्वतस्थिराय नमः ।

६२८ ॐ भूशयाय नमः ।

६२९ ॐ भूषणाय नमः ।

६३० ॐ भूतये नमः ।

६३१ ॐ विशोकाय नमः ।

६३२ ॐ शोकनाशनाय नमः ।

६३३ ॐ अर्चिष्मते नमः ।

६३४ ॐ अर्चिताय नमः ।

६३५ ॐ कुम्भाय नमः ।

६३६ ॐ विशुद्धात्मने नमः ।

६३७ ॐ विशोधनाय नमः ।

६३८ ॐ अनिरुद्धाय नमः । *(see 185)*

६३९ ॐ अप्रतिरथाय नमः ।

६४० ॐ प्रद्युम्नाय नमः ।

६४१ ॐ अमितविक्रमाय नमः । *(see 516)*

६४२ ॐ कालनेमिनिघ्ने नमः ।

६४३ ॐ वीराय नमः ।

६४५ ॐ शौरये नमः । *(see 340)*

६४५ ॐ शूरजनेश्वराय नमः ।

६४६ ॐ त्रिलोकात्मने नमः ।

६४७ ॐ त्रिलोकेशाय नमः ।

६४८ ॐ केशवाय नमः । *(see 23)*

६४९ ॐ केशिघ्ने नमः ।

६५० ॐ हरये नमः ।

६५१ ॐ कामदेवाय नमः ।

६५२ ॐ कामपालाय नमः ।

६५३ ॐ कामिने नमः ।

६५४ ॐ कान्ताय नमः । *(see 296)*

६५५ ॐ कृतागमाय नमः ।

६५६ ॐ अनिर्देश्यवपुषे नमः । *(see 177)*

६५७ ॐ विष्णवे नमः । *(see 2, 258)*

६५८ ॐ वीराय नमः । *(see 643)*

६५९ ॐ अनन्ताय नमः ।

६६० ॐ धनञ्जयाय नमः ।

६६१ ॐ ब्रह्मण्याय नमः ।

६६२ ॐ ब्रह्मकृते नमः।

६६३ ॐ ब्रह्मणे नमः ।

६६४ ॐ ब्राह्मणे नमः ।

६६५ ॐ ब्रह्मविवर्धनाय नमः ।

६६६ ॐ ब्रह्मविदे नमः ।

६६७ ॐ ब्राह्मणाय नमः ।

६६८ ॐ ब्रह्मिणे नमः ।

६६९ ॐ ब्रह्मज्ञाय नमः ।

६७० ॐ ब्राह्मणप्रियाय नमः ।

६७१ ॐ महाक्रमाय नमः ।

६७२ ॐ महाकर्मणे नमः ।

६७३ ॐ महातेजसे नमः ।

६७४ ॐ महोरगाय नमः ।

६७५ ॐ महाक्रतवे नमः ।

६७६ ॐ महायज्वने नमः ।

६७७ ॐ महायज्ञाय नमः ।

६७८ ॐ महाहविषे नमः ।

६७९ ॐ स्तव्याय नमः ।

६८० ॐ स्तवप्रियाय नमः ।

६८१ ॐ स्तोत्राय नमः ।

६८२ ॐ स्तुतये नमः ।

६८३ ॐ स्तोत्रे नमः ।

६८४ ॐ रणप्रियाय नमः ।

६८५ ॐ पूर्णाय नमः ।

६८६ ॐ पूरयित्रे नमः ।

६८७ ॐ पुण्याय नमः ।

६८८ ॐ पुण्यकीर्तये नमः ।

६८९ ॐ अनामयाय नमः ।

६९० ॐ मनोजवाय नमः ।

६९१ ॐ तीर्थकराय नमः ।

६९२ ॐ वसुरेतसे नमः ।

६९३ ॐ वसुप्रदाय नमः ।

६९४ ॐ वासुदेवाय नमः । *(see 332)*

६९५ ॐ वसवे नमः । *(see 104, 270)*

६९६ ॐ वसुमनसे नमः । *(see 105)*

६९७ ॐ हविषे नमः । *(see 697)*

६९८ ॐ सद्गतये नमः ।

६९९ ॐ सत्कृतये नमः ।

७०० *ॐ ॐॐॐॐॐॐ नमः।*

७०१ ॐ सत्तायै नमः ।

७०२ ॐ सद्भूतये नमः ।

७०३ ॐ सत्परायणाय नमः ।

७०४ ॐ शूरसेनाय नमः ।

७०५ ॐ यदुश्रेष्ठाय नमः ।

७०६ ॐ सन्निवासाय नमः ।

७०७ ॐ सुयामुनाय नमः ।

७०८ ॐ भूतावासाय नमः ।

७०९ ॐ वासुदेवाय नमः । *(see 332, 694)*

७१० ॐ सर्वासुनिलयाय नमः ।

७११ ॐ अनलाय नमः । *(see 293)*

७१२ ॐ दर्पघ्ने नमः ।

७१३ ॐ दर्पदाय नमः ।

७१४ ॐ दृप्ताय नमः ।

७१५ ॐ दुर्धराय नमः । *(see 266)*

७१६ ॐ अपराजिताय नमः ।

७१७ ॐ विश्वमूर्तये नमः ।

७१८ ॐ महामूर्तये नमः ।

७१९ ॐ दीप्तमूर्तये नमः ।

७२० ॐ अमूर्तिमते नमः ।

७२१ ॐ अनेकमूर्तये नमः ।

७२२ ॐ अव्यक्ताय नमः ।

७२३ ॐ शतमूर्तये नमः ।

७२४ ॐ शताननाय नमः ।

७२५ ॐ एकस्मै नमः ।

७२६ ॐ नैकस्मै नमः ।

७२७ ॐ सवाय नमः ।

७२८ ॐ काय नमः ।

७२९ ॐ कस्मै नमः ।

७३० ॐ यस्मै नमः ।

७३१ ॐ तस्मै नमः ।

७३२ ॐ पदायानुत्तमाय नमः ।

७३३ ॐ लोकबन्धवे नमः ।

७३४ ॐ लोकनाथाय नमः ।

७३५ ॐ माधवाय नमः । *(see 72, 167)*

७३६ ॐ भक्तवत्सलाय नमः ।

७३७ ॐ सुवर्णवर्णाय नमः ।

७३८ ॐ हेमाङ्गाय नमः ।

७३९ ॐ वराङ्गाय नमः ।

७४० ॐ चन्दनाङ्गदिने नमः ।

७४१ ॐ वीरघ्ने नमः । *(see 166)*

७४२ ॐ विषमाय नमः ।

७४३ ॐ शून्याय नमः ।

७४४ ॐ घृताशिषे नमः ।

७४५ ॐ अचलाय नमः ।

७४६ ॐ चलाय नमः ।

७४७ ॐ अमानिने नमः ।

७४८ ॐ मानदाय नमः ।

७४९ ॐ मान्याय नमः ।

७५० ॐ लोकस्वामिने नमः ।

७५१ ॐ त्रिलोकधृषे नमः ।

७५२ ॐ सुमेधसे नमः ।

७५३ ॐ मेधजाय नमः ।

७५४ ॐ धन्याय नमः ।

७५५ ॐ सत्यमेधसे नमः ।

७५६ ॐ धराधराय नमः ।

७५७ ॐ तेजोवृषाय नमः ।

७५८ ॐ द्युतिधराय नमः ।

७५९ ॐ सर्वशस्त्रभृतांवराय नमः ।

७६० ॐ प्रग्रहाय नमः ।

७६१ ॐ निग्रहाय नमः ।

७६२ ॐ व्यग्राय नमः ।

७६३ ॐ नैकश्रृङ्गाय नमः ।

७६४ ॐ गदाग्रजाय नमः ।

७६५ ॐ चतुर्मूर्तये नमः ।

७६६ ॐ चतुर्बाहवे नमः ।

७६७ ॐ चतुर्व्यूहाय नमः । *(see 138)*

७६८ ॐ चतुर्गतये नमः ।

७६९ ॐ चतुरात्मने नमः । *(see 137)*

७७० ॐ चतुर्भावाय नमः ।

७७१ ॐ चतुर्वेदविदे नमः ।

७७२ ॐ एकपदे नमः ।

७७३ ॐ समावर्ताय नमः ।

७७४ ॐ अनिवृत्तात्मने नमः ।

७७५ ॐ दुर्जयाय नमः ।

७७६ ॐ दुरतिक्रमाय नमः ।

७७७ ॐ दुर्लभाय नमः ।

७७८ ॐ दुर्गमाय नमः ।

७७९ ॐ दुर्गाय नमः ।

७८० ॐ दुरावासाय नमः ।

७८१ ॐ दुरारिघ्ने नमः ।

७८२ ॐ शुभाङ्गाय नमः । *(see 586)*

७८३ ॐ लोकसारङ्गाय नमः ।

७८४ ॐ सुतन्तवे नमः ।

७८५ ॐ तन्तुवर्धनाय नमः ।

७८६ ॐ इन्द्रकर्मणे नमः ।

७८७ ॐ महाकर्मणे नमः । *(see 672)*

७८८ ॐ कृतकर्मणे नमः ।

७८९ ॐ कृतागमाय नमः । *(see 655)*

७९० ॐ उद्भवाय नमः । *(see 373)*

७९१ ॐ सुद्गराय नमः ।

७९२ ॐ सुद्राय नमः ।

७९३ ॐ रत्ननाभाय नमः ।

७९४ ॐ सुलोचनाय नमः ।

७९५ ॐ अर्काय नमः ।

७९६ ॐ वाजसनाय नमः ।

७९७ ॐ श्रृङ्गिणे नमः ।

७९८ ॐ जयन्ताय नमः ।

७९९ ॐ सर्वविज्जयिने नमः ।

८०० ॐ उद्भवाय नमः । *(see 373, 790)*

८००-१ ॐ सुवर्णबिद्रवे नमः ।

८००-१ ॐ अक्षोभ्याय नमः ।

८०१ ॐ अधोक्षजाय नमः ।

८०२ ॐ सर्ववागीश्वरेश्वराय नमः ।

८०३ ॐ महाह्रदाय नमः ।

८०४ ॐ महागर्ताय नमः ।

८०५ ॐ महाभूताय नमः ।

८०६ ॐ महानिधये नमः ।

८०७ ॐ कुमुदाय नमः । *(see 588)*

८०८ ॐ कुन्दराय नमः ।

८०९ ॐ कुन्दाय नमः ।

८१० ॐ पर्जन्याय नमः ।

८११ ॐ पावनाय नमः । *(see 292)*

८१२ ॐ अनिलाय नमः । *(see 234)*

८१३ ॐ अमृताशाय नमः ।

८१४ ॐ अमृतवपुषे नमः ।

८१५ ॐ सर्वज्ञाय नमः । *(see 453)*

८१६ ॐ सर्वतोमुखाय नमः ।

८१७ ॐ सुलभाय नमः ।

८१८ ॐ सुव्रताय नमः । *(see 455)*

८१९ ॐ सिद्धाय नमः । *(see 97)*

८२० ॐ शत्रुजिते नमः ।

८२१ ॐ शत्रुतापनाय नमः ।

८२२ ॐ न्यग्रोधाय नमः ।

८२३ ॐ उदुम्बराय नमः ।

८२४ ॐ अश्वत्थाय नमः ।

८२५ ॐ चाणूरान्ध्रनिषूदनाय नमः ।

८२६ ॐ सहस्रार्चिषे नमः ।

८२७ ॐ सप्तजिह्वाय नमः ।

८२८ ॐ सप्तैधसे नमः ।

८२९ ॐ सप्तवाहनाय नमः ।

८३० ॐ अमूर्तये नमः ।

८३१ ॐ अनघाय नमः । *(see146)*

८३२ ॐ अचिन्त्याय नमः ।

८३३ ॐ भयकृते नमः ।

८३४ ॐ भयनाशनाय नमः ।

८३५ ॐ अणवे नमः ।

८३६ ॐ बृहते नमः ।

८३७ ॐ कृशाय नमः ।

८३८ ॐ स्थूलाय नमः ।

८३९ ॐ गुणभृते नमः ।

८४० ॐ निर्गुणाय नमः ।

८४१ ॐ महते नमः ।

८४२ ॐ अधृताय नमः ।

८४३ ॐ स्वधृताय नमः ।

८४४ ॐ स्वास्याय नमः ।

८४५ ॐ प्राग्वंशाय नमः ।

८४६ ॐ वंशवर्धनाय नमः ।

८४७ ॐ भारभृते नमः ।

८४८ ॐ कथिताय नमः ।

८४९ ॐ योगिने नमः ।

८५० ॐ योगीशाय नमः ।

८५१ ॐ सर्वकामदाय नमः ।

८५२ ॐ आश्रमाय नमः ।

८५३ ॐ श्रमणाय नमः ।

८५४ ॐ क्षामाय नमः । *(see 443)*

८५५ ॐ सुपर्णाय नमः । *(see 192)*

८५६ ॐ वायुवाहनाय नमः । *(see 331)*

८५७ ॐ धनुर्धराय नमः ।

८५८ ॐ धनुर्वेदाय नमः ।

८५९ ॐ दण्डाय नमः ।

८६० ॐ दमयित्रे नमः ।

८६१ ॐ दमाय नमः ।

८६२ ॐ अपराजिताय नमः । *(see 716)*

८६३ ॐ सर्वसहाय नमः ।

८६४ ॐ नियन्त्रे नमः ।

८६५ ॐ अनियमाय नमः । *(see 161)*

८६६ ॐ अयमाय नमः । *(see 162)*

८६७ ॐ सत्त्ववते नमः ।

८६८ ॐ सात्त्विकाय नमः ।

८६९ ॐ सत्याय नमः । *(see 106, 212)*

८७० ॐ सत्यधर्मपरायणाय नमः ।

८७१ ॐ अभिप्रायाय नमः ।

८७२ ॐ प्रियार्हाय नमः ।

८७३ ॐ अर्हाय नमः ।

८७४ ॐ प्रियकृते नमः ।

८७५ ॐ प्रीतिवर्धनाय नमः ।

८७६ ॐ विहायसगतये नमः ।

८७७ ॐ ज्योतिषे नमः ।

८७८ ॐ सुरुचये नमः ।

८७९ ॐ हुतभुजे नमः ।

८८० ॐ विभवे नमः । *(see 240)*

८८१ ॐ रवये नमः ।

८८२ ॐ विरोचनाय नमः ।

८८३ ॐ सूर्याय नमः ।

८८४ ॐ सवित्रे नमः ।

८८५ ॐ रविलोचनाय नमः ।

८८६ ॐ अनन्ताय नमः । *(see 659)*

८८७ ॐ हुतभुजे नमः । *(see 879)*

८८८ ॐ भोक्त्रे नमः । *(see 143, 500)*

८८९ ॐ सुखदाय नमः । *(see 459)*

८९० ॐ नैकजाय नमः ।

८९१ ॐ अग्रजाय नमः ।

८९२ ॐ अनिर्विण्णाय नमः । *(see 435)*

८९३ ॐ सदामर्षिणे नमः ।

८९४ ॐ लोकाधिष्ठानाय नमः ।

८९५ ॐ अद्भुताय नमः ।

८९६ ॐ सनात् नमः ।

८९७ ॐ सनातनतमाय नमः ।

८९८ ॐ कपिलाय नमः ।

८९९ ॐ कपये नमः ।

९०० ॐ अप्ययाय नमः । *(see 13)*

९०१ ॐ स्वस्तिदाय नमः ।

९०२ ॐ स्वस्तिकृते नमः ।

९०३ ॐ स्वस्तये नमः ।

९०४ ॐ स्वस्तिभुजे नमः ।

९०५ ॐ स्वस्तिदक्षिणाय नमः ।

९०६ ॐ अरौद्राय नमः ।

९०७ ॐ कुण्डलिने नमः ।

९०८ ॐ चक्रिणे नमः ।

९०९ ॐ विक्रमिणे नमः । *(see 75)*

९१० ॐ उर्जितशासनाय नमः ।

९११ ॐ शद्बातिगाय नमः ।

९१२ ॐ शद्बसहाय नमः ।

९१३ ॐ शिशिराय नमः ।

९१४ ॐ शर्वरीकराय नमः ।

९१५ ॐ अक्रूराय नमः ।

९१६ ॐ पेशलाय नमः ।

९१७ ॐ दक्षाय नमः । *(see 423)*

९१८ ॐ दक्षिणाय नमः ।

९१९ ॐ क्षमिणां वराय नमः ।

९२० ॐ विद्वत्तमाय नमः ।

९२१ ॐ वीतभयाय नमः ।

९२२ ॐ पुण्यश्रवणकीर्तनाय नमः ।

९२३ ॐ उत्तारणाय नमः ।

९२४ ॐ दुष्कृतिघ्ने नमः ।

९२५ ॐ पुण्याय नमः । *(see 687)*

९२६ ॐ दुस्वप्ननाशनाय नमः ।

९२७ ॐ वीरघ्ने नमः । *(see 166, 741)*

९२८ ॐ रक्षणाय नमः ।

९२९ ॐ सद्भ्यो नमः ।

९३० ॐ जीवनाय नमः ।

९३१ ॐ पर्यवस्थिताय नमः ।

९३२ ॐ अनन्तरूपाय नमः ।

९३३ ॐ अनन्तश्रिये नमः ।

९३४ ॐ जितमन्यवे नमः ।

९३५ ॐ भयापहाय नमः ।

९३६ ॐ चतुरस्राय नमः ।

९३७ ॐ गभीरात्मने नमः ।

९३८ ॐ विदिशाय नमः ।

९३९ ॐ व्यादिशाय नमः ।

९४० ॐ दिशाय नमः ।

९४१ ॐ अनादये नमः ।

९४२ ॐ भुवोभुवे नमः ।

९४३ ॐ लक्ष्म्यै नमः ।

९४४ ॐ सुवीराय नमः ।

९४५ ॐ रुचिराङ्गदाय नमः ।

९४६ ॐ जननाय नमः ।

९४७ ॐ जनजन्मादये नमः ।

९४८ ॐ भीमाय नमः । *(see 357)*

९४९ ॐ भीमपराक्रमाय नमः ।

९५० ॐ आधारनिलयाय नमः ।

९५१ ॐ अधात्रे नमः । *(see 43)*

९५२ ॐ पुष्पहासाय नमः ।

९५३ ॐ प्रजागराय नमः ।

९५४ ॐ उर्ध्वगाय नमः ।

९५५ ॐ सत्पथाचाराय नमः ।

९५६ ॐ प्राणदाय नमः । *(see 65, 321)*

९५७ ॐ प्रणवाय नम ।

९५८ ॐ पणाय नमः ।

९५९ ॐ प्रमाणाय नमः । *(see 428)*

९६० ॐ प्राणनिलयाय नमः ।

९६१ ॐ प्राणभृते नमः ।

९६२ ॐ प्राणजीवाय नमः ।

९६३ ॐ तत्त्वाय नमः ।

९६४ ॐ तत्त्वविदे नमः ।

९६५ ॐ एकात्मने नमः ।

९६६ ॐ जन्ममृत्युजरातिगाय नमः ।

९६७ ॐ भुर्भुवः स्वस्तरवे नमः ।

९६८ ॐ ताराय नमः । *(see 338)*

९६९ ॐ सवित्रे नमः । *(see 884)*

९७० ॐ प्रपितामहाय नमः ।

९७१ ॐ यज्ञाय नमः । *(see 445)*

९७२ ॐ यज्ञपतये नमः ।

९७३ ॐ यज्वने नमः ।

९७४ ॐ यज्ञाङ्गाय नमः ।

९७५ ॐ यज्ञवाहनाय नमः ।

९७६ ॐ यज्ञभृते नमः ।

९७७ ॐ यज्ञकृते नमः ।

९७८ ॐ यज्ञिने नमः ।

९७९ ॐ यज्ञभुजे नमः ।

९८० ॐ यज्ञसाधनाय नमः ।

९८१ ॐ यज्ञान्तकृते नमः ।

९८२ ॐ यज्ञगुह्याय नमः ।

९८३ ॐ अन्नाय नमः ।

९८४ ॐ अन्नादाय नमः ।

९८५ ॐ आत्मयोनये नमः ।

९८६ ॐ स्वयञ्जाताय नमः ।

९८७ ॐ वैखानाय नमः ।

९८८ ॐ सामगायनाय नमः ।

९८९ ॐ देवकीनन्दनाय नमः ।

९९० ॐ स्रष्ट्रे नमः । *(see 588)*

९९१ ॐ क्षितीशाय नमः ।

९९२ ॐ पापनाशनाय नमः ।

९९३ ॐ शङ्खभृते नमः ।

९९४ ॐ नन्दकिने नमः ।

९९५ ॐ चक्रिणे नमः । (see 908)

९९६ ॐ शार्ङ्गधन्वने नमः ।

९९७ ॐ गदाधराय नमः ।

९९८ ॐ रथाङ्गपाणये नमः ।

९९९ ॐ अक्षोभ्याय नमः । (see 800-2)

१००० ॐ सर्वप्रहरणायुधाय नमः ।

*Some additional names (It turns out that there are many repeated names.) One needs to add **99** more names in addition to those listed below and above to make it truly a collection of **1000** names. Even one can construct shloka-s with these names.*

ॐ गोपिकावल्लभाय नमः ।

ॐ वामनाय नमः ।

ॐ सङ्कर्षणाय नमः ।

॥ इति श्रीविष्णु सहस्रनामावली ॥

Two-line prayer for all the nine planets:

ब्रह्मामुरारिस्त्रिपुरांतकारी भानुश्शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रश्च शनि राहु केतवः कुर्वंतु सर्वे मम सुप्रभातम् ॥